ओम्

# विषय-सूचिः

| विषयः | पृष्ठाङ्कः |
|---|---|
| आमुखम् | iii |
| भूमिका | ix-xvii |
| अर्जुनरावणीयस्य सर्ग-विभाजनं श्लोक-संख्या च | xxviii |
| सङ्केताक्षरविवरणम् | xxix |

**गाङ्कुटादिपादे (प्रथमाध्याय-द्वितीयपादे) प्रथमः सर्गः-** **1-10**

नायकस्य कृतवीर्यसूनोरर्जुनस्य गुणानां वर्णनम्। ततश्च तस्मिन् भूमिं शासति शरदागमन-प्रस्तावेन शरदृतु-वर्णनम्।

**भूवादिपादे (प्रथमाध्याय-तृतीयपादे) द्वितीयः सर्गः-** **11-25**

अर्जुनस्य शरदृतु-शोभावलोकनार्थं राजधानीतो नर्मदां प्रति प्रस्थानोपक्रमः। राजमार्गे पुरसुन्दरीणामौत्सुक्येन राजदर्शनार्थमागमनम्। नारीणां मिथोऽर्जुनस्य गुणानां सङ्कथा।

**आकडारादिपादे (प्रथमाध्याय-चतुर्थपादे) तृतीयः सर्गः-** **26-36**

सेनया सह माहिष्मत्या निर्गतस्य राज्ञः कार्त्तवीर्यस्य वने मृगया-विहारः।

**समर्थपादे (द्वितीयाध्याय-प्रथमपादे) चतुर्थः सर्गः-** **37-46**

राज्ञोऽन्तःपुरनारीभिः सह नर्मदाजल-विहारः।

**पूर्वापरपादे (द्वितीयाध्याय-द्वितीयपादे) पञ्चमः सर्गः-** **47-53**

सूर्यास्तमयवर्णनं सन्ध्यावर्णनञ्च।

**अनभिहितपादे (द्वितीयाध्याय-तृतीयपादे) षष्ठः सर्गः-** **54-69**

चन्द्रोदयवर्णनं विप्रलम्भवर्णनं रात्रिक्रीडावर्णनञ्च।

**द्विगुपादे (द्वितीयाध्याय-चतुर्थपादे) सप्तमः सर्गः-** **70-80**

प्रतिनायकस्य रावणस्य राजसभायां भुवं भ्रान्त्वा प्रत्यावृत्तेन चार-मण्डलेन कार्त्तवीर्यैश्वर्यस्य वर्णितम्। तच्छ्रुत्वा क्रुद्धस्य रावणस्यार्जुनविजयाय तद्राजधानीं माहिष्मतीं प्रति प्रस्थानम्।

**प्रत्ययपादपूर्वार्धे (तृतीयाध्याय-प्रथमपादे) अष्टमः सर्गः-** **81-92**

विमानगतस्य रावणस्य माहिष्मत्याः सौन्दर्यस्य समृद्धेश्चावलोकनम्। तादृशीं नगरीं दृष्ट्वा ईर्ष्याकषायितचित्तस्य कुपितस्य दशाननस्य युद्धाह्वानायार्जुनं प्रति शुकस्य दूतरूपेण प्रेषणम्। कार्त्तवीर्यो नगरीं

विहाय नर्मदाजलविहाराय गत इति शुकेनागत्य सूचितम्।

**प्रत्ययपादोत्तरार्धे (तृतीयाध्याय-प्रथमपादोत्तरार्धे) नवमः सर्गः-** 93-103

रावणसैन्यवर्णनं विन्ध्यपर्वतवर्णनञ्च। ततश्च रावणस्य नर्मदा-तीरागमनम्, नर्मदावर्णनम्, रावणस्य नर्मदास्नानम्।

**कर्मण्यण्पादपूर्वार्द्धे (तृतीयाध्याय-द्वितीयपादपूर्वार्द्धे) दशमः सर्गः-** 104-114

रावणस्य नर्मदातटे पुष्पोपहितस्य शिवलिङ्गस्यार्चनम्। ततः कियद्दूरे नर्मदाजलविहार-निरतस्य सहस्रार्जुनस्य बाहूनां सहस्रेण नर्मदाजलस्य संरोधः। प्रतीपगामिना जलेन रावणस्य पूजासामग्र्याः प्रवाहणम्। तद् दृष्ट्वा प्रचण्डकोपो रावण एतस्य कारणं ज्ञातुं शुकं प्रेषितवान्।

**कर्मण्यण्पादपश्चार्धे (तृतीयाध्याय-द्वितीयपादपश्चार्धे) एकादशः सर्गः** 115-126

सानुजस्य शुकस्य नर्मदातटमार्गेण जलविहारव्यापृतं सहस्रार्जुनं प्रति प्रस्थानम्। कार्तवीर्यस्य सलीलं सलिलावगाहं बाहुसहस्रेण नदीजलावरोधं च सविस्मयं दृष्ट्वा शुकेन प्रत्यागत्य सकलवृत्तान्तः रावणाय निवेदितः।

**उणादिपादे (तृतीयाध्याय-तृतीयपादे) द्वादशः सर्गः-** 127-144

रावणस्य हैहयराजमर्जुनं प्रति युद्धार्थनाय शुकस्य दूतरूपेण प्रेषणम्। काननमार्गेण कार्त्तवीर्यराजधानीं प्राप्य शुकस्यार्जुनं प्रति रावणपराक्रम-वर्णनपुरस्सरं तत्सन्देशस्य कथनम्।

**धातुसम्बन्धपादे (तृतीयाध्याय-चतुर्थपादे) त्रयोदशः सर्गः-** 145-158

राजसभायां रावणदूतस्य शुकस्य वचनं श्रुत्वा कार्त्तवीर्यमन्त्रिणः प्रत्युत्तरम्। तच्छ्रुत्वा कुपितस्य शुकस्य मन्त्रिणं प्रति कटुभाषणं रावणशौर्यस्य वर्णनञ्च। तेन सभागत–सुभटवृन्दस्य कोपसंरम्भो युद्धौत्सुक्यञ्च। सुभटैर्दूतस्य निग्रहोपक्रमः, राज्ञा कार्त्तवीर्येण सङ्केतद्वारा दूतनिग्रहणस्य निषेधः। शुकस्य निर्गमनम्।

**ङ्याप्प्रातिपदिकपादे तेन रक्तपादे च (चतुर्थाध्यायस्य प्रथमे द्वितीये च पादे) चतुर्दशः सर्गः-** 159-173

दशाननदूते गते राजसभायां सहस्रार्जुनस्य रावणनिग्रहणे मन्त्रणा, पापिष्ठत्वात्तस्य निग्रहणनिर्णयः। रणभेरीनादः सैनिकानां सन्नाहश्च। सेनया सह राज्ञो रणभूमिं प्रति प्रस्थानम्।

**युष्मदस्मत्पादे प्राग्वहतेष्ठक्पादे च (चतुर्थाध्यायस्य तृतीये चतुर्थे च पादे) पञ्चदशः सर्गः-** 174-185

रावणपक्षे युद्धपटहनादेन सह युद्धाय प्रस्थानोपक्रमः। रावणं युद्धाद् वारयितुं मन्दोदर्या रावणस्यानुनयनम्। रावणस्य मन्दोदरीप्रार्थनावहेलनं कृत्वा स्वलोकोत्तरप्रतापवर्णनपुरस्सरं युद्धाय प्रस्थानम्। तस्यानिष्टचेष्टासूचनाय मन्दोदर्याः पुलस्त्याश्रमगमनम्।

**प्राक्क्रीताच्छपादे धान्यानां पादे च (पञ्चमाध्यायस्य प्रथमे द्वितीये च पादे) षोडशः सर्गः-** 186-201

रावणार्जुन-सेनयोर्मध्ये तुमुलसङ्ग्रामः। तत्र राक्षसपक्षक्षयः।

सूर्यस्तमनवेलायां युद्धविरामः।

**प्राग्दिशीयपादे पादशतादिपादे च (पञ्चमाध्यायस्य तृतीये चतुर्थे च पादे) सप्तदशः सर्गः-** 202-218

सूर्यास्तमयवर्णनम्। तदानीमुभयोः सेनयोः स्वस्वशिविरागमनम्। चन्द्रोदयवर्णनम्। सहस्रबाहु-भटानां रात्रिक्रीडाया वर्णनम्। रावण-मन्दोदर्योर्विप्रलम्भ-वर्णनम्।

**एकाचो द्वे पादे (षष्ठाध्याय-प्रथमपादे) अष्टादशः सर्गः-** 219-229

सूर्योदयवर्णनम्। द्वितीयदिवसेऽपि युद्धाय भटानां सन्नाहः। संग्रामोत्सुकान् भटान् दृष्ट्वा अनिष्टाशङ्कातङ्कितानां तन्नारीणां कातरतावर्णनम्। सहस्रार्जुनस्य सेनया सह रणभूमिं प्रति प्रस्थानम्। तत्र नर-राक्षससेनापत्योर्द्वन्द्व-युद्धवर्णनम्। कार्त्तवीर्यस्य रणे रावणसम्मुखगमनम्।

**अलुगुत्तरपादे (षष्ठाध्याय-तृतीयपादे) एकोनविंशः सर्गः-** 230-241

कार्त्तवीर्य-रावणयोर्युद्धवर्णनम्। नानास्त्रप्रयोगेण लोमहर्षणसंग्रामः। अन्तेऽर्जुनेन दशास्यस्य चापध्वजातपत्राणां छेदनम्। ततो रथादवतीर्णेन खड्गहस्तेन रावणेन सहार्जुनस्य खड्गयुद्धारम्भः।

**अङ्गपादे (षष्ठाध्याय-चतुर्थपादे) विंशः सर्गः-** 242-256

कार्त्तवीर्यरावणयोः खड्गयुद्धवर्णनम्। रावणस्य खड्गभङ्गे गदाग्रहणम्। ततो द्वयोर्गदायुद्ध-वर्णनम्। राज्ञा प्रहृतस्य रावणस्य मूर्च्छाधिगमः। शुकस्य विलापः। कियत्कालानन्तरं मूर्च्छापगमे पुना रावणस्य गदायुद्धम्। अर्जुनेन रावणस्य गदाया भञ्जनम्। द्वयोर्भुजयुद्धवर्णनम्। कार्त्तवीर्येण भुजपाशद्वारा वशीकृत्य रावणस्य बन्धनम्।

**युवोरनाकपादे (सप्तमाध्याय-प्रथमपादे) एकविंशः सर्गः-** 257-265

ततः शुकसारणयोः पुलस्त्याश्रमं गत्वा मुनये रावणबन्धन-वृत्तान्तस्य निवेदनम्। मन्दोदरीविलापः। पुलस्त्यकृतं रावण-गर्हणम्।

**सिचि वृद्धिपादे (सप्तमाध्याय-द्वितीयपादे) द्वाविंशः सर्गः-** 266-281

पुनरपि मन्दोदरीसमक्षं पुलस्त्यकृतं रावण-गर्हणम्। शुकसारणयोः रावणविमोक्षाय पुलस्त्यं प्रति प्रार्थनम्। पुलस्त्यस्य रावणं विमोचयितुमाश्रमात् कार्त्तवीर्यपुरीं प्रति प्रस्थानम्।

**देविकापादे (सप्तमाध्याय-तृतीयपादे) त्रयोविंशः सर्गः-** 282-292

इतो जितारेः हैहयराजस्य बद्धं रावणमादाय वन्यमार्गेण राजधानीं प्रति आगमनम्।

**णौ चङ्यादिपादे (सप्तमाध्याय-चतुर्थपादे) चतुर्विंशः सर्गः-** 293-303

सेनासहितस्यार्जुनस्य पुरीप्रवेशवर्णनम्। जितारेः कार्त्तवीर्यस्य दर्शनार्थमुत्सुकानां नारीणां राजमार्गगमनम्। मिथो हैहयराजस्य गुणानां चर्चा। पराजितस्य कारागारबद्धस्य रावणस्य ग्लानताया वर्णनम्। गृहागतानां भटानां

रात्रिक्रीडाया वर्णनम्।

**सर्वस्व द्वे पादे पूर्वत्रासिद्धपादे च (अष्टमाध्यायस्य द्वितीये तृतीये च पादे) पञ्चविंशः सर्गः-** 304-311

कार्त्तवीर्यस्य राजसभाया वर्णनम्, तत्र पुलस्त्यागमनम्। आतिथेयेन राज्ञा पुलस्त्यस्य सत्कारकरणम्।

**मतुवसो रु पादे (अष्टमाध्याय-तृतीयपादे) षड्विंशः सर्गः-** 312-321

पुलस्त्येन राजसभायां कार्त्तवीर्यस्य श्लाघनं रावणस्य गर्हणं च। ततः कार्त्तवीर्येण सह तस्य मैत्रीसम्पादनमेव क्षेमकरमिति पुलस्त्यकथनं निशम्य राज्ञार्जुनेन कारागाराद् राजोचितसम्मानपुरस्सरं रावणस्यानयनम्। पुलस्त्येन द्वयोर्हस्तमेलनपुरस्सरमग्निसाक्षिक-सख्यस्य सम्पादनम्।

**रषाभ्यां पादे (अष्टमाध्याय-चतुर्थपादे ) सप्तविंशः सर्गः-** 322-330

सुहृद्भूतयोः नरेन्द्र-राक्षसेन्द्रयोः पुलस्त्यनिर्देशेन राजसभे एकासनोपवेशनम्। अर्जुनो भूयोऽपि मुनीश्वरं पुलस्त्यं प्रति दर्शनानुग्रहाय कृतज्ञतां प्रकाशितवान् उक्तवांश्च- भगवन्! इतः परं किमत्रभवतोऽभीष्टं करवाणि? तच्छ्रुत्वा सन्तुष्टस्य पुलस्त्यस्य रावणेन सह प्रस्थानाभिलाषस्य प्रवेदनम्। ततः कार्त्तवीर्येण ससम्मानं समालिङ्ग्य विसर्जितस्य दशाननस्य पितामहेन पुलस्त्येन सह पुष्पकविमानद्वारा प्रस्थानम्।

## अर्जुनरावणीय-परिशिष्टभागः

| | | |
|---|---|---|
| परिशिष्टम्-1. | **अर्जुनरावणीयस्य भाषावृत्तिगतान्युद्धरणानि-** | 331-337 |
| परिशिष्टम्-2. | **अर्जुनरावणीयस्य दुर्घटवृत्तिगतान्युद्धरणानि-** | 338-340 |
| परिशिष्टम्-3. | **अर्जुनरावणीयस्य कथावस्तुनो रामायणगत उपजीव्यभागः-** | 341-345 |
| परिशिष्टम्-4. | **अर्जुनरावणीयकथा-पात्रपरिचयः-** | 346-348 |
| परिशिष्टम्-5. | **अर्जुनरावणीय-सुभाषितानुक्रमणिका-** | 349-354 |
| परिशिष्टम्-6. | **उदाहृतसूत्रानुक्रमणिका** (उदाहृतवार्तिकानुक्रमणिका च) | 355-383 |
| परिशिष्टम्-7. | **उदाहरणानुक्रमणिका-** | 384-446 |
| परिशिष्टम्-8. | **श्लोकानुक्रमणिका-** अर्जुनरावणीयश्लोकानां (समीक्षात्मक-संस्करणगतानां) मातृकावर्णक्रमेणानुक्रमणिका | 447-469 |
| परिशिष्टम्-9. | **रावणार्जुनीय-विषयक शोधप्रबन्ध-** | 470 |
| परिशिष्टम्-10. | **सन्दर्भग्रन्थ-सूचिः-** | 471-473 |
| | [ ति. (तिरुवनन्तपुरम्)-मातृकाविवरणम् ] | 474 |